International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(3): 205-208
© 2026 IJMH
www.themultijournal.com

Received: 30-05-2026
Accepted: 24-06-2026
Publish : 26-06-2026

G. Srikanth Reddy
Research Scholar,
Department of Agama,
National Sanskrit University,Tirupati

Correspondence:
G. Srikanth Reddy
Research Scholar,
Department of Agama,
National Sanskrit University,Tirupati

अनिरुध्दसंहितायां प्रोक्तानि आचार्यलक्षणानि

G. Srikanth Reddy

चातुर्व्यूहं परंब्रह्म षाड्गुण्यपरिकीर्तितम् ।
पाञ्चरात्रस्य कृत्स्नस्य प्रसूतिं पर्युपास्महे ॥

आगमाः

आगमो नाम अनादिसम्प्रदायसिद्धगुरुशिष्यपरम्परोपदेशक्रमागतः शास्त्रसन्दर्भः। **आप्तवचनादाविर्भूत-मर्थविशेष संवेदनमागमः**[1] इति प्रमाण यतत्वालोके देवसूरिभिः।

सृष्टिश्च प्रलयश्चैव देवतानां तथाऽर्चनम्।
साधनञ्चैवमन्त्राणां पुरश्चरणमेव च।।
षट्कर्मसाधनञ्चैव ध्यानयोगश्चतुर्विधः।
सप्तभिर्लक्षणैर्युक्तत्वागमं तद्विदुर्बुधाः।।[2] इति

तन्त्रेष्वागमशब्दं निर्वहन्ति। पौष्करसंहितायां आगमशब्दनिर्वचनम्-

कर्त्तव्यत्वेन वै यत्र चातुरात्म्यमुपासते।
क्रमागतैस्स्वसंज्ञाभिः ब्राह्मणैरागमं तु तत्।।[3] इति

वासुदेवाख्य परब्रह्मोपासनमेव चातुरात्म्योपासनमित्युक्तम्। एवमागमापरनामानि तन्त्राणि शैवशाक्तवैष्णवभेदेन त्रेधा भिद्यन्ते। तत्र शैवागमाः शिवपारम्यं शिवपूजादिकञ्च प्राधान्येन प्रतिपादयन्ति। शाक्तागमा दक्षिणाचार वामाचारभेदेन द्विधा। उभयेऽपीमे शक्तिपारम्यं शक्ति-पूजादिकञ्च विशेषतः प्रतिपादयन्ति। वैष्णवागमाश्च वैखानसपाञ्चरात्रभेदेन द्विधा भवन्ति। उभयेऽपीमे विष्णुपारम्यं विष्णुपूजादिकञ्च प्राधान्येन प्रतिपादयन्ति।

पाञ्चरात्रम्

तदिदमेकायनश्रुतिमूलकं शास्त्रं पञ्चरात्रमिति व्यवह्रियते। पाञ्चरात्रशब्दनिर्वचनन्तु बहुत्र बहुधा कथ्यते। इमानि कानिचन प्रधानानि प्रमाणवचनानि प्रकाशितानि। ईश्वरसंहितायाम्-

पञ्चायुधांशास्ते पञ्च शाण्डिल्यश्चौपगायनः।
मौञ्जायनःकौशिकश्च भारद्वाजश्च योगिनः।। इत्यारभ्य - - - - - - -
पञ्चापि पृथगेकैकदिवारात्रं जगत्प्रभुः।
अध्यापयामास यतस्तदेतन्मुनिपुङ्गवाः।।
शास्त्रं सर्वजनैलोके पञ्चरात्रमितीर्यते।।[4]इति

पञ्चायुधानामंशत्वेन परिगण्यमानेभ्यः पञ्चेभ्यः शाण्डिल्यौपगायनमौञ्जायनकौशिक भरद्वाजेभ्यः पञ्चभिरहोरात्रैः जगत्प्रभुणा उपदिष्टं शास्त्रं पञ्चरात्रमिति प्रोक्तम्। मार्कण्डेयसंहितायाम्-

सार्धकोटिप्रमाणेन कथितं तस्य विष्णुना।
रात्रिभिः पञ्चभिः सर्वं पञ्चरात्रमतः स्मृतम्।। मार्क.सं. इति। नाम

ब्रह्मणा सार्धकोटिप्रमाणेन पञ्चसु रात्रिषु केशवाच्छ्रुतं शास्त्रं पञ्चरात्रमिति कथितम्। अनिरुद्ध-संहितायां प्रथमोऽध्याये -**पञ्चरात्रं मया प्रोक्तं लोकानां हितकाम्यया।।**

ब्रह्मेन्द्ररुद्रदेवांश्च श्रावयामास भूतले।
साङ्ख्ययोगादि शास्त्राणि रात्रियन्ते महान्त्यपि।।[5]इति

साङ्ख्ययोगवैशेषिकन्यायमीमांसाख्यानि पञ्चशास्त्राणि यत्र रात्रीयन्ते तच्छास्त्रं पञ्चरात्रमिति न्यरूपि। । महाभारते मोक्षधर्मे-

एवमेकं साङ्ख्ययोगं वेदारण्यकमेव च।

परस्पराङ्गान्येतानि पञ्चरात्रं तु कथ्यते।।[6] इति

अत्र वेदारण्यकसाङ्ख्ययोगाख्यानि चत्वारि शास्त्राणि सम्भूयैकमिति पञ्चविधज्ञान -समाहारात्पञ्चरात्रमिति संज्ञा व्यासेनप्रकाशितेति श्रीभाष्याभिप्रायः। विष्णुसंहितायाम्—

रात्रयो गोचराः पञ्च शब्दादिविषयात्मिकाः।
महाभूतात्मिका वात्र पञ्चरात्रमिदं ततः।।
अवाप्य तु परं तेजो यत्रैताः पञ्चरात्रयः।
नश्यन्ति पञ्चरात्रं तत् सर्वज्ञानविनाशनम्।।[7]इति

शब्दादिविषयात्मिका महाभूतात्मिका वा पञ्चगोचरा रात्रयः परमं तेज आसाद्य नश्यन्ति। अतः एतत्पाञ्चरात्रमित्युक्तम्। अहिर्बुध्न्यसंहितायाम्—

तत्परव्यूहविभवस्वभावादिनिरूपणम्।
पाञ्चरात्राह्वयं तन्त्रं मोक्षैकफल लक्षणम्।। अहि.सं. 11.63 इति

यदुपपादितं परव्यूहविभवान्तर्याम्यर्चावताराः इति। सर्वनिर्वचन-पर्यालोचनेन इदमवश्यं सिद्ध्यति यदिदं सर्वशास्त्रापेक्षयोत्कृष्टं परमश्रेयस्साधकं चेति। स्वार्थपरार्थपूजाविचारः निरूपितः। **भगवदर्चनं चेदं स्वार्थं परार्थञ्चेति द्विविधम्।**[8] स्वार्थं नामाराधकेन स्वस्य नित्य -कर्मसु अन्यतमतयावश्यानुष्ठेयत्वेन भगवन्मुखो-ल्लाससिद्ध्यर्थमनन्यप्रयोजनतया क्रियमाण -मर्चनम्। परार्थं नाम स्वयंव्यक्तादिदेवालये पुरवासिनां **सर्वेषां योगक्षेमयोः कृते क्रियमाण - मर्चनम्। तथाचोक्तं वामनसंहितायाम्-**

स्वार्थः परार्थ इति किं भेदोऽयं कथ्यतां हरे।
नगरे पत्तने ग्रामे मध्ये वा गिरि संस्थिते।
स्वयंव्यक्तस्थलेष्वत्र तोताद्र्यादिषु पूजकाः।।

- - - - - - - - - - - - - - -

परार्थस्त्वब्जगतश्चक्षुः स्वार्थोऽयं गृहदीपवत्।
इतिज्ञात्वा हरेः पूजां कुर्याद्दे ऋषिसुङ्गवाः!॥[9] इति

भारद्वाजसंहितायाम् - **किं स्वार्थं च परार्थं किं के च तत्राधिकारिणः।**
तदेतन्मुनिशार्दूल वदस्व वदतां वर! ॥
स्वगृहे स्थापितो देवः स्वार्थ इत्यभिधीयते।
पर्वताग्रे नदीतीरे सिन्धुतीरे वनादिके ॥
शाण्डिल्याद्यान्वये जाताः गुरोर्लक्षण लक्षिताः॥ भार.सं. इति।

वेदैश्च सर्वैरहमेव वेद्यः वेदान्तकृद्वेदविदेव चाहमिति श्रीगीतायाः पञ्चदशाध्याये स्वयमेव भगवता निरूपितत्वेन सकलवेदवेद्यः स एवेति प्रामाणिकानां निष्कर्षः। पुरुषोत्तमतया जगत्कारणत्वेन च श्रियःपतिः श्रीमन्नारायण एव वेदेन प्रत्यपादि। अत एव सः वेदैकवेद्यः। तत्प्रतिपादकाः, तदाराधनानिरूपकाश्च आगमाः वैदिका एव भवन्ति इत्यत्र नास्ति संशीति लेशोऽपि। वैष्णवागमयोः श्रीवैखानसपाञ्चरात्रयोर्मध्ये श्रीपाञ्चरात्रमेव प्रशस्ततरम्। साक्षा-द्विष्णो रेव तदुपदेष्टृत्वादिदमेवाभिप्रायं महाभारते प्रकटीचकार। यथा- पाञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणः स्वयमिति। छान्दोग्ये तावत्, भूमविद्याप्रसंगे नारदसनत्कुमार संवादमुखेन, नारदाधीतविद्याप्रस्तावनायां, ऋग्वेदं भगवोऽध्येमि। यजुर्वेदं, सामवेदमाथर्वणं, चतुर्थमितिहासपुराणं पंचमं वेदानां वेदं वाकोवाक्यम्, एकायन-मित्यादिना, एकायनशब्देन पांचरात्रप्रस्ताव एव विहितः। अतः स्मृतित्वेन, भगवत्प्रोक्तत्वेन च पांचरात्रसंहितावाह्वयः भुक्तिमुक्तिप्रदः सन् परम्प्रमाणतां प्राप्य महीयते। श्रीपाञ्चरात्र-शास्त्रं मन्त्रागमतन्त्र तन्त्रान्तरप्रभेदैः चतुर्धा प्रवृत्तमित्यवगम्यते। एतेषां चतुर्णामेव सिद्धान्त-शब्दव्यवहार्याणां प्रकाराणां विशदनाय भगवान्, चतुर्मुखादिमुखतः अष्टोत्तरशतसं-ख्याकाः संहिताः प्रत्यबोधयदिति ज्ञायते। पाद्म-श्रीप्रश्न-विष्णुतिलकप्रभृतयः मन्त्रसिद्धान्तानुसारि- प्रक्रियामेव प्रदर्श्यन्ति। तदनुसारिणी अनिरुद्धसंहिता अपि। इमां च संहितां भगवदाराधन - प्रतिपादनपरां, साक्षादनिरुद्धरूपात् भगवतः स्वयं प्राप्य, भृगुमहर्षिः इतरर्षिभ्यः समुपदि-देशेति अस्मादेव ग्रन्थादवगम्यते। इमां प्रस्तुतामनिरुद्धसंहितां, स्वयमनिरुद्धरूपो भगवान् भृगवे समुपदिदेश। पांचरात्रशब्दस्य बहूनि निर्वचनानि प्रदर्शितानि। एतद्वैभव-प्रकाशकतया बह्वीरुत्पत्तीः स्वयंपरमात्मैव प्राहैति अवगम्यते। भगवानेव पांचरात्रवैभवं प्रावोत्। यथा- **पाञ्चरात्रादृते विप्र मुक्ति मार्गो न विद्यते** इति। एतेन भुक्तिमुक्तिप्रदाय- कत्वेन पांचरात्रस्येतरवैलक्षण्यं निरतिशयमवगम्यते इति सर्वसमाद-रणीयत्वमवसीयते।

चतुस्त्रिंशदध्यायात्मकेऽस्मिन् संहिताग्रन्थे विलक्षणाः बहवो विषयाः स्पष्टीभवन्ति। दीक्षाविधाने, कुंडनिर्माण प्रक्रियायाम्, हवनविधौ, मूर्तिबेरसंख्या निर्णये, स्नपनस्य परापरविभागकरणे च विशेष प्रतिपादनप्रक्रिया अत्र ग्रन्थे समुपलभ्यते। एतादृशास्सन्ति बहवस्संहिता ग्रन्थाः ये केचन प्रकाशिताः, कतिचन प्रकाशयमपेक्षन्ते। अप्रकाशितानां च समुन्नयनं मुद्रणं च नूनं महायज्ञायते। एवं यत्र क्वचित् निगूढतया विद्यमानामिमा-मनिरुद्धसंहितां समुद्धृत्य, विद्वत्परिष्कृतां विधाय, सम्मुद्र्य जिज्ञासुलोकसात्करणाय कृतोऽयं भगीरथप्रयत्नः सफलस्सञ्जात इति मोमुदीति चेतः। ग्रन्थमिमं सुन्दरतया प्राकाश्यमुपनीय, श्रीमन्तो गट्टु रंगाचार्यस्वामिनः तत्पितरौ च भाग्यशालिन इति विश्वसिमः।एतत्प्रकाशने यैः बहुप्रकारः सहयोगः कृतः, ते सर्वेऽपि मंगलाशासनैरभिवर्ध्यन्ते।

पाञ्चरात्रसंहिता विभागः

एतच्छास्त्रग्रन्थाश्च संहिता इति उपनिषद इति तन्त्राणीति च व्यवह्रियन्ते। तत्र केचन विस्तृताः पाद्मसंहितादयः ज्ञान-योग-क्रिया-चर्यापादाख्यैः चतुर्धा। संहितासु पादविभागमन्तरैवतद्ग्रन्थार्थन् प्रतिपादयन्ति। ज्ञानपादे परब्रह्मणः लक्षणम्, जीवस्वरूपम्, जगत्सृष्ट्यादि विवेचनं, मोक्षप्रभृतयः प्रस्तूयन्ते। योगपादे यमनियमादीनां योगाङ्गानां विचारः। क्रियापादे आलयनिर्माणार्थं कर्षणादिप्रतिष्ठाविधिः विचारः। चर्यापादे भगवदाराधनं नित्यनैमित्तिककाम्योत्सवः मण्डलपूजास्नपनप्रायश्चित्तप्रभृतीनां संबन्धिनो विषयाः निर्दिश्यन्ते।

अनिरुध्दसंहिता

इयं खलु अनिरुद्धसंहिता नाम पाञ्चरात्रागमसम्बन्धिनी दिव्यागमनाम्ना प्रथिता भगवतः चातुरात्म्योपासनप्रतिपादिकेति पाञ्चरात्रिकाणां विदितचरमेव। कृत्स्नस्य पाञ्चरात्रस्य भगवन्मुख - विनिर्गतत्वेनैव प्राशस्त्यमवगन्तव्यं। तद्यथा पाद्मे —

तद्वत्सर्वेषु शास्त्रेषु पाञ्चरात्रं प्रशस्यते।
सर्वेषामपि शास्त्राणां सारभूतं हरेःप्रियम्॥
रहस्यं पाञ्चरात्राख्यं ऋषयो ह्यभिलेभिरे। [10]इति

अस्य पाञ्चरात्रस्य दिव्यागमसंज्ञापि विष्णुरहस्यादौ ख्याप्यते —

श्रौतं वैखानसं प्रोक्तं वासिष्ठं स्मार्तमुच्यते।
पाञ्चरात्राभिधं शास्त्रं दिव्यागममितीरितम्॥ [11]इति

अत्रैव अनिरुद्धसंहितायां द्वितीयोध्याये —

पञ्चरात्रं महाज्ञानं नारायणसमीरितम्।
पञ्चरात्रात्परं शास्त्रं न भूतं न भविष्यति॥

इत्यारभ्य —**पञ्चरात्रविदो दानं कोटिगोदानजं फलम्।**

कन्यादानशताच्छ्रेष्ठं स्वर्णनिष्कशतादपि॥[12] इति

पञ्चरात्रशास्त्रस्य एवं पञ्चरात्रविदांश्च प्राशस्त्यं सम्यक्प्रपञ्चितम्। अस्यां अनिरुद्धसंहितायां

पौष्करसंहितोक्तप्रकारः सात्वतसंहितोक्त प्रकारश्चावलम्बितः इति ज्ञायते यथा चतुर्विंशे-

ऽध्याये पवित्रारोपण प्रकरणे-

पौष्करोक्तप्रकारेण यन्त्रं विष्णुमथापि वा।
वासुदेवाख्य यन्त्रं वा सात्वतोक्तमथापि वा॥ इति

पूर्वोक्त प्रकारेण चेयं अनिरुद्धसंहिता ज्ञान-योग-क्रिया-चर्याख्य पादविभागमन्तरेव तद्भूतार्थान् सङ्ग्रहेण प्रतिपादयति चेयं संहिता।

आचार्यलक्षणम्

अनिरुध्दसंहितायां तृतीयाध्याये पाञ्चरात्रविधिर्नाम योग्यस्याचार्यलक्षणानि निरूपितानि। द्वितीयाध्यये निरुपितपाञ्चरात्रशास्त्रस्य वैभवप्रकाशने आचार्यस्यापि स्थानं मुख्यमेव आचार्यः नाम देवालये सर्वेषां नित्यनैमित्तिककाम्योत्सवानां निर्वहणार्थं यजमानस्या-भीष्टीनुसारं विलक्षणं प्रत्येकरूपेणाचार्यः वरणीयः। तस्यैव देशिकः मूर्तिपः इत्यपि नामान्तरम्। पाञ्चरात्रीयकर्मणां निर्वहणे चितस्य आचार्यदीक्षा अत्यावश्यकी। तया दीक्षया देशिकः देवालाये प्रधानविधिषु भागग्रहणे योग्यवान् भवेत्। भगवतः श्रीमहविष्णोः मुखकमलान्निसृतः विशिष्टः पाञ्चरात्र-सिध्दान्तः अन्येभ्यः न भूतो न भविष्यतीत्युक्तरीत्य प्रसिध्दिमवाप। तच्छास्त्रानुसारेण देवालय- विधीनां निर्वहणार्थं योग्यभूतस्याचार्यस्य कतिपयलक्षणानि अस्यां संहितायां विशिष्टरूपेण विवृतानि सामान्यतः-

आचिनोति हि शास्त्रार्थान् आचारे स्थापयत्यपि।
स्वयमाचरते यस्तु तमाचार्यं प्रचक्षते।। इति

पण्डितैः भणितम्। तादृशः आचार्यः शुध्दब्राह्मणवंशे सञ्जातः। तथा नियतरूपेण ब्रह्मज्ञानि च भवेत्। एवं पूर्वाचार्यैः लब्धपाञ्चरात्रशास्त्रवेत्त नाम परम्परागतशास्त्रज्ञानसिध्दश्च भवेत्। एवमन्तरिन्द्रियबहिरिन्द्रियनिग्रदशाली

अहरहरनुष्ठीयमाननित्यानुष्ठाननिष्ठागरिष्ठः भवेत्। युवानः मृदुस्वभावी अवलोकने प्रशान्तभावुकः, व्यवहारे सरळस्वभावश्च स्यात्। एवमेव वेदवेदाङ्ग तत्वज्ञः श्रुतस्मार्तादिकर्मणां निर्वहणे श्रध्दाळुः भवेत्। सदा भगवत्चितनापरः स्वयं भगवदाराधनतत्परः भगवतद्गतप्राणः भजनसंकीर्तणापरः एवं भगवत्कथालोलुपश्च भवेत्। यथा-

पाञ्चरात्रविदं दान्तं सदाचारसमन्वितम्।
युवानं कोमलं शान्तं सर्वावयवशोभितम्।।
वेदवेदाङ्गतत्वज्ञं श्रौतस्मार्तक्रियापरम्।
मच्चित्तं मद्गतप्राणं मदाराधनतत्परम्।।[13] इति

तथैवाचार्यः शुभगुणवान् शुचिः ऋजुभाषी कर्मणि कुशलः पञ्चकालानिसारतः, प्राणाय -मादियोगाङ्गानां निर्वहणे दक्षः, मुद्रमण्डलकुण्डार्चनादिषु समर्थः पञ्चकालपरायणः, व्रतोपवासनिरतः, सर्वपापविनिर्मुक्तः, कर्षणाद्यागमक्रियाकालापेषु निष्णातः अपि भवेत्। सः आचार्यः तप्तचक्राङ्कितः पञ्चाङ्गभूषणनिष्ठः वैदिककर्मसु कुशलत्वेन स्वतन्त्रः, एकादशी - व्रतोपवसी द्वादशीपारणादक्षश्च भवेत्। त्रिविधतत्वज्ञानी मन्त्रयन्त्रतन्त्रकलापेषु निष्णातः। शिल्पशास्त्रे कृतभूरिपरिश्रमः, शिल्पनिर्माणकोविदः, मन्दिस्मितवदनः, स्मितपूर्वाभिभाषी स्वाचार्यसेवापरायणः, स्वदारानिरतः, सुखभोगप्राप्तरूपपुत्रसहितः, क्षयादिहीनव्याधिपीडा- रहितः, दुराचारविवर्जितः, सर्वभूतदयापरः, कल्याणावयवी, दम्भासूयादिरहितः, काममोहा -दिविवर्जितः, अलोलुपः, वाद्यवादनवर्गाभिज्ञः, गीतनृत्यादिसंगीतशास्त्रविचक्षणः, वाद्य -वादनवर्गाभिज्ञः, तालवर्गाभिज्ञः तालवर्गादिविशारदश्च आचार्यः भवेतीत्युक्तम्। यथा-

उत्सवादिक्रियादक्षं सहस्रकलशे क्षमम्।
द्वादश्याराधनपरं द्वादशाक्षरचिन्तकम्।।
स्वतन्त्रकर्मकुशलं योगाग्निनिरतं शुचितम्।
शङ्खचक्राङ्कितभुजं धृतपञ्चाङ्गभूषणम्।।[14] इति

एवं उपरीयुक्तलक्षणैर्युक्त आचार्यः सर्वविध शास्त्रीय कर्मणां निर्वहणार्थं यजमानः विशेषेण वृणुयात्। अवान्तरपक्षे स आचार्यः विनयादिगुणैर्युक्तं धर्मश्रुतिपरायणं श्रध्दावन्तं परमास्तिकं आचार्याज्ञापालनादक्षं विलक्षणं शिष्यं वृणीष्य तस्मै विलक्षणं पाञ्चरात्रशास्त्र-मुपदिशेत्। पुरुषोत्तमसंहितायां द्वितीयेऽध्याये आचार्यलक्षणम्, भूपरीक्षाविधिश्चैकचत्वा- रिंशच्छलोकैः निरूप्येते। भगवतः समाराधनं याग इति, समाराधकः यजमान इति, तदुपदेष्टा आचार्य इति व्यवह्रियन्ते। कर्षणादिप्रतिष्ठान्तकर्मणां कर्ता यजमानः सर्वलक्षण सम्पन्नमाचार्यं प्रथमं वरयेत्। । सः शान्तः (बहिरिन्द्रियनिग्रहवान्), दान्तः-अन्तरिन्द्रिय) निग्रहवान् (पाञ्चरात्रशास्त्रज्ञः, भगवद्वंशजः, अचञ्चलः, दम्भरहितः, भागवतः, एकपत्नी-व्रतम्, सद्ब्राह्मणः, सत्यवाक्, सदाचारसमन्वितः, युवा सुन्दरः सर्वावयवशोभितः, वेदवित् सर्वशास्त्रार्थतत्त्वज्ञः, नित्याग्निहोत्री, परोपकाररतः, योगविद्या परिज्ञाता, अपापवित्, अष्टाक्षरीजप परायणः, भगवत्परश्च भवेत्। सम्प्रति यजमानलक्षणमुच्यते। यजमानस्तु ब्राह्मणः, क्षत्रियः, वैश्यः शूद्रो वा

स्यात्। धर्मतत्परः, श्रद्धाभक्ति समन्वितः, त्यागी च भवेदिति कथ्यते। यथा-

ब्राह्मणः क्षत्रियो वैश्यश्शूद्रोवाऽप्यनुलोमजः।
श्रद्धाभक्तिसमायुक्तो धनाढ्यो धर्मतत्परः।।

- - - - - - - - - - - - - - - - - - -

उत्पत्तिस्थितिसंहारवेदिनं ब्रह्मवादिनम्।
प्रतिष्ठाकर्मतत्त्वज्ञं सन्ध्योपासनतत्परम्।।[15]इति।

एतादृशलक्षणलक्षितः यजमानः प्रशान्तचित्तः देवालयनिर्माणार्थं प्रयतमानः तदनुष्ठानतत्परमाचार्यं प्रथम-वरयेत्। काञ्चनं भुवं नारिकेलं वा यथाशक्ति आचार्याय दक्षिणां दद्यात् आचार्यलक्षणमुद्दिश्य विविधपाञ्चरात्रसंहितासु प्रस्तावितः। विशेषतया अगस्त्यसंहिताया मष्टमोध्याये-, अनिरुद्धंसहितायां तृतीये, अहिर्बुध्ये विंशतितमेऽध्याये च प्रस्तावितम्। तत्रैव षट्चत्वारिंशेऽध्याये आचार्यः पुरोहितनाम्नाभिवर्णितम्। यथा-

धार्मिकः श्रुतिसम्पन्नः सुशीलः सत्यवाक्च्छुचिः।
अभिजातोऽनहङ्कारस्तितिक्षुः स्मृतिमान् वशी।।
देशकालविभागज्ञः शास्त्रदृष्टिरतन्द्रितः।
अप्रधृष्योऽप्रमादी च वदान्यो नयकोविदः।।
ईदृशो दूर्लभो राज्ञां गुरुवाल्पः पुरोहितः।
ईदृशो क्षमो राज्ञामघौघविनिवारणे।।[16] इति।

कपिञ्जले प्रथमेऽध्याये त्रयस्त्रिंशच्छ्लोकैः, द्वितीयेऽध्याये अष्टश्लोकैः, आचार्यलक्षण-मुपदिष्टम्। जयाख्यसंहितायां प्रथमेऽध्याये, सप्तमेऽध्याये 46-62श्लोकैः अष्टादशोऽध्याये 69-82 श्लोकैः, नारदीये अष्टमे दशमेऽध्याययोः च, पराशरसंहितायां प्रथमेऽध्याये आचार्यलक्षणानि ऊचुः। पाद्मसंहितायां क्रियापादे प्रथमेऽध्याये एवं चतुर्विंशेऽध्याये पञ्चविंशतिश्लोकैः आचार्य लक्षणानि प्रोक्तानि। चर्यापादे अष्टमेऽध्याये 88-118 श्लोकैः आचार्ययोग्यतासंस्काराणां वर्णनं चकार। अत्र केचनश्लोकाः प्रस्तूयन्ते-

पञ्चकालविधानज्ञः सत्कर्मनियतः क्षमी।।[17]
षोडशन्यासचतुरः षडध्वन् षडङ्गविदलोलुपः।।
षोडशन्यासचतुरः सौम्यः सिद्धान्तभेदवित्।[18]
कुशाग्री यतिश्शान्तः नीतिज्ञो देशकालवित्।।[19]
व्यसनाभ्युदये शश्वदेकरूपस्सदन्वयः।।
मितभाषी ध्यानपरः द्वादशाक्षरचिन्तकः।[20] इति।

पौष्करसंहितायां प्रथमेऽध्याये पञ्चचत्वारिंशच्छ्लोकैः आचार्यलक्षणानि अभिहितानि। एकविंशेऽध्याये त्रिभिः श्लोकैः, मार्कण्डेये द्वादशेऽध्याये, लक्ष्मीतन्त्रे एकविंशेऽध्याये त्रिशच्छ्लोकैः, भारद्वाजसंहितायां द्वितीयभागे प्रथमेऽध्याये 39-45श्लोकैः, विष्णुसंहितायां षोडशेऽध्याये, विष्णुतिलकसंहितायां षष्ठेऽध्याये, शाण्डिल्यसंहितायां चतुर्थे, षोडशेऽध्याये च पुरोहित इति पदेनाचार्यं वर्णितम्। श्रीप्रश्ने चतुर्थेऽध्याये 16-18श्लोकैः सनत्कुमार-संहितायां ब्रह्मरात्रे पञ्चमेऽध्याये 118-125 श्लोकैः आचार्यस्य पुत्रकः साधक इति पदाभ्यां व्यवहृतम्। तत्रैव इन्द्ररात्रौ चतुर्थेऽध्याये अष्टमे नवमेऽध्याये च सात्त्वते षोडशेऽध्याये32-43श्लोकैः आचार्य लक्षणानि निरूपितानि। आचार्यशब्दस्य दीक्षकः, साधकः, कृत्यकः, शिष्योद्धारकः, स्वयंदीक्षि तेत्यादपर्यायपदानि अन्यपाञ्चरात्रसंहितासु उल्लेखिताः।

उपयुक्तग्रन्थसूची

1.अनिरुध्दसंहिता सम्पादकः एस्.नरसराजभट्टाचार्यः, मेलकोठे, 2009
2.भारद्वाजसंहिता - सरयू प्रसादमिश्रः बम्बई 1987
3.पौष्करसंहिता-हेच्.हेच्.सम्पत्कुमारमुनिः मेल्कोट् 1934
4.मार्कण्डेयसंहिता -वि.एस्. सुक्थुङ्कर् ए.ग्र.ङ.क्ष्. घ्द्वदङ्ड 1933
5.विष्णुसंहिता -ति.गणपति शास्त्रि तिरुवनन्तपुरम् पब्लिषर्स् 1925
6. विष्णुतिलकसंहिता - के.राघवाचार्यः, वि. कृष्णमाचार्यः बेंगळूर् 1893
7. शाण्डिल्यसंहिता- अनन्तशास्त्रि फडके सर्वकारसंस्कृतग्रन्थालय ण्डम्बनारस् 1935

पाद टिप्पणी -

1. प्रमा.त. उपो.
2. तर्कवाचस्पत्यम्- 1.4-5
3. पौष्करसंहिता- 1.15
4. ईश्वरसंहिता 21.5-9
5. अनि.सं. 1.34b-35
6. महा.भा. मोक्षधर्म. 365.22
7. वि.सं. 1.49-51
8. अनि.सं.1.44
9. वामनसंहिता
10. पाद्म.सं.ज्ञान.2.22-23 a
11. विष्णुरहस्यम् 2.33
12. अनि.सं.2.2-20a
13. अनि.सं(3.2,3)
14. अनि.सं(2.9,10)
15. पु7-2.2 .सं.
16. पु7-2.2 .सं.
17. पु7-2.2 .सं.
18. पादम्24.4 .चर्या .
19. पादम्24.5 चर्या .
20. पादम्94.4 चर्या .